कालक्रमेण तथापि ह्रास एव तु दृश्यते ।
केचिद्वदन्ति ते रागाः सर्व्वे सन्तीति निश्चितम् ॥
मेरोरुत्तरतः पूर्व्वे पश्चिमे दक्षिणे तथा ।
समुद्रकच्छे ये देशास्तत्रामीषां प्रचारणा ॥”

तथा च । अङ्गवङ्गकलिङ्गतैलङ्गभूलिङ्गद्राविड़-सुरङ्गयूपलङ्कखेलाङ्गसौवीरकीरकाश्मीरनाभी-रनाहीरसिन्धुजालन्धरमगममगधनिषधमलयही-ह्यगलाड्यमालवजालवमरुमरुचोलोत्कलकु-न्तलसिंहलहरिकेलकेरल-कोशलमलिवालमल्ल-भल्लसौविदत्तवातकिल्लातगुर्जरातगुर्ज्जरकालञ्जर-गौड़द्रविड़ौड्रान्तर्व्वेदिकाश्चीपाञ्चालसौराष्ट्रश-वरलौहावरखशकीकशवरूपकामरूपहरिगर्भ-विदर्भदुर्मटवाटकीकटदेवैङ्गनटङ्गनगाटभोटक-वाटकरहाटकर्णाटकुन्तिकावन्तिककनकाल-कान्यकुब्जभोजकाम्बोजतोजतुखारविहारवली-हारवाणगेहविदेहवाह्लीकचचरीकत्रिगर्त्तान-र्त्तादिदेशेषु रागाः प्रचरन्तीति ।

“यस्य श्रवणमात्रेण रज्यन्ते सकलाः प्रजाः ।
सर्व्वानुरञ्जनाद्धेतोस्तेन राग इति स्मृतः ॥”*॥

अथ रागाः ।

“आदौ मालवरागेन्द्रस्ततो मल्लारसंज्ञितः ।
श्रीरागश्च ततः पश्चाद्वसन्तस्तदनन्तरम् ॥
हिन्दोलश्चाथ कर्णाट एते रागाः षडेव तु ।६।
षट्त्रिंशद्रागिण्यो तत्र क्रमशः कथिता मया ॥
धानसी मालसी चैव रामकिरी च सिन्धुड़ा ।
आशावरी भैरवी च मालवस्य प्रिया इमाः ॥६
वेलावली च पुरवी कानड़ा माधवी तथा ।
कोड़ा केदारिका चापि मल्लारदयिता इमाः॥६
गान्धारी शुभगा चैव गौरी कौमारिका तथा ।
वेलोयारी च वैरागी श्रीरागस्य प्रिया इमाः॥६
तुड़ी च पञ्चमी चैव ललिता पठमञ्जरी ।
गुज्जरी च विभाषा च वसन्तस्य प्रिया इमाः॥६
मायूरी दीपिका चैव देशकारी च पाहिड़ा ।
वराड़ी मोरहाटी च हिन्दोलस्य प्रिया
इमाः ॥६॥
नाटिका चाथ भूपाली रामकेली गड़ा तथा ।
कामोदा चापि कल्याणी कर्णाटस्य प्रिया
इमाः ॥६॥३६॥*॥

अथ कालनियमः ।

“विभाषा ललिता चैव कामोदा पठमञ्जरी ।
रामकीरी रामकेली वेलोयारी च गुज्जरी ॥
देशकारी च शुभगा पञ्चमी च गड़ा तुड़ी ।
भैरवी चाथ कौमारी रागिण्यो दश पञ्च च ।
एताः पूर्व्वाह्णकाले तु गीयन्ते गायनोत्तमैः ॥
वराड़ी मायूरी कोड़ा वैरागी चाथ धानसी ।
वेलावली मोरहाटी सप्तैता रागयोषितः ।
गेया मध्याह्नकाले तु यथा भारतभाषितम् ॥
गान्धारी दीपिका चैव कल्याणी पुरवी तथा ।
कानड़ा शावरी चैव गौरी केदारपाहिड़ा ॥
मायूरी मालसी नाटी भूपाली सिन्धुड़ा तथा ।
सायाह्ने ताश्च रागिण्यः प्रगायन्ति चतुर्द्दश ॥
पुरुषा वस्तुभूषाढ्या रागास्ते मालवादयः ।
प्रदोषे चापराह्ने च रजन्यां गानगोचराः ॥
दशदण्डात् परं रात्रौ सर्व्वेषां गानमीरितम् ।
मेघमल्लाररागस्य गानं वर्षासु सर्व्वदा ॥
श्रीपञ्चम्यां समारभ्य यावत् जन्मोत्सवं हरेः ।
तावद्वसन्तरागस्य गानमुक्तं मनीषिभिः ॥
शक्रोत्थानं समारभ्य यावद्दुर्गामहोत्सवम् ।
गीयते तद्बुधैर्नित्यं मालसी सा मनोहरा ॥
सर्व्वेषामिह रागाणां रागिणीनाञ्च सर्व्वशः ।
रङ्गभूमौ नृपाज्ञायां कालदोषो न विद्यते ॥
रागञ्चालापयेदादौ तत्पत्नीस्तदनन्तरम् ।
नान्यपत्नी प्रगातव्या नृपाज्ञायां न दूषणम् ॥
रागाः षड़्च रागिण्यः षट्त्रिंशच्चारु-
विग्रहाः ।
आगता ब्रह्मसदनात् ब्रह्माणं समुपासते ॥”*॥

अथ ध्यानम् ।

“नितम्बिनीचुम्बितवक्त्रपद्मः
शुकद्युतिः कुण्डलवान् प्रमत्तः ।
सङ्गीतशालां प्रविशन् प्रदोषे
मालाधरो मालवरागराजः ॥ १ ॥
नीलोत्पलं कर्णयुगे वहन्ती
श्यामा सुकेशी च सुमध्यभागा ।
ईषत्सहासाम्बुजरम्यवक्त्रा
सा धानसी पद्मसचारुनेत्रा ॥ १ ॥
करे शुका चाम्बुजयुग्मरम्या
इतस्ततश्चारु विलोकयन्ती ।
कण्ठस्फुरन्मौक्तिकरत्नहारा
सा मालसी संकथिता विचित्रा ॥ २ ॥
प्रतप्तचामीकरचारुवक्त्रा
कर्णावतंसं कमलं वहन्ती ।
पुष्पं धनुः पुष्पशरैर्दधाना
चन्द्रानना रामकिरी प्रदिष्टा ॥३॥
महेन्द्रनीलद्युतिरम्बुजाक्षी
प्रवादयन्ती कपिलाशयन्त्रम् ।
विचित्ररत्नाभरणा सुकेशी
सा सिन्धुड़ा कान्तसमीपसंस्था ॥४॥
जवाप्रसूनद्युतिबिम्बवक्त्रा
सकञ्चुपद्मं करयोर्दधाना ।
चीनांशुकाच्छादितगात्रयष्टि-
राशावरी रङ्गकिला विदग्धा ॥५॥
सरोवरस्था स्फटिकस्य मन्दिरे
सरोरुहैः शङ्करमर्च्चयन्ती ।
तालप्रयोगप्रतिरङ्गगीते
गौरीतनुर्भैरविका सतीयम् ॥”६॥*॥

अथ मल्लारः ।

“विहारशीलोऽतिसुकान्तदेहः
कान्ताप्रियो धार्म्मिकशीलयुक्तः ।
कामातुरः पिङ्गलनेत्रयुग्मो
मल्लाररागः प्रियहृत् सुवेशः ॥१॥
सङ्केतितोत्फुल्लकतानिकुञ्जे
कृतस्थितिः कान्तसमागमाय ।
वेलावली चम्पकमौलिनी सा
बाला विचित्राभरणा निरुक्ता ॥१॥
रहःसु कान्तप्रियमाल्यपत्रं
रम्यं वहन्ती कुचकुम्भयुग्मे ।
दूर्व्वादलश्यामतनुः सकामा
पुरातनैः सा पुरवी निरुक्ता ॥२॥
अशोकवृक्षस्य तले निषण्णा
वियोगिनी वाष्पकणाञ्चिताङ्गी ।
विभूषिताङ्गी जटिलेव बाला
सा कानड़ा हेमलतेव तन्वी ॥३॥
संगृह्य संगृह्य गले दधाना
प्रसूनमाला दयितेन बाला ।
गौरी स्वकान्ताननचुम्बितास्या
सा सुन्दरी माधविका निकुञ्जे ॥४॥
सुकच्छपीं वादयति स्वभर्त्तु-
र्गानार्थमभ्यस्यति सम्मुखेन ।
सदैव ताला विहिता च माला
कोड़ा कला तानवती मता सा ॥५॥
स्नात्वा समुत्तीर्णवती सुदेहा
केशप्रक्षिप्यन्दितवारिबिन्दुः ।
निष्पीड़यन्ती तिमिरांशुकान्तं
केदारिका रक्तपयोधरश्रीः ॥”६॥*॥

अथ श्रीरागः ।

“लीलावतारेण वनान्तराले
चिन्वन् प्रसूनानि वधूसहायः ।
विलासवेशो धृतिदिव्यमूर्त्तिः
श्रीराग एव प्रथितः पृथिव्याम् ॥१॥
सन्ध्यासुकाले गृहमध्यदेशे
प्रवादयन्ती ह पिनाकयन्त्रम् ।
धाराधराधातुविभूषिताङ्गी
गान्धारिका गन्धसजं निधत्ते ॥ १ ॥
रसनया सुविचारकौतुकं
विदधती कविकोविदकौतुकम् ।
सुकवितामृतभावतत्परा
भगवती सुभगा समुदाहृता ॥२॥
पुष्पोद्याने सार्द्रमालीकलापैः
क्रीड़न्त्येवं कोकिलाकाकलीषु ।
रामा श्यामा सद्गुणागाध मीमा
गौरी गौरी गौरवालोकदिष्टा ॥३॥
अट्टालिकायां स्फुटकौमुदीभिः
प्रकाशितायां रजनीविहारम् ।
अहाय कान्तेन समं वसन्ती
कौमारिका कामकला वहन्ती ॥४॥
गौरीपादाम्भोजमभ्यर्च्चयन्ती
गन्धोद्भूतं गन्धमाल्यं दधाना ।
नानारत्नोपायनैर्भक्तिभावै-
र्वेलोयारी कथ्यते बालिकेयम् ॥५॥
उल्लासयन्ती धम्मिल्ल रहःस्थान् प्राणबन्धुना ।
मालतीकुसुमस्रग्भिर्व्वैरागी रागिणी स्मृता ॥”६

अथ वसन्तः ।

“चूताङ्कुरेणैव कृतावतंसो
विघूर्णमानारुणनेत्रपद्मः ।
पीताम्बरः काञ्चनचारुदेहो
वसन्तरागो युवतिप्रियश्च ॥१॥